# Shri Harikusumastavah

# શ્રીહરિકુસુમસ્તવઃ

## Document Information

Text title : harikusumastavaH

File name : harikusumastavaH.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# Shri Harikusumastavah

# શ્રીહરિકુસુમસ્તવઃ

ગતિગઞ્જિતમત્તતરદ્વિરદં
    રદનિન્દિતસુન્દરકુન્દમદમ્ ।
મદનાર્બુદરૂપમદઘ્નરુચિં
    રુચિરસ્મિતમઞ્જરિ મઞ્જુમુખમ્ ॥ ૧॥

મુખરીકૃતવેણુહૃતપ્રમદં
    મદવલ્ગિતલોચનતામરસમ્ ।
રસપૂરવિકાસકકેલિપરં
    પરમાર્થપરાયણલોકગતિમ્ ॥ ૨॥

ગતિમણ્ડિતયામુનતીરભુવં
    ભુવનેશ્વરવન્દિતચારુપદમ્ ।
પદકોજ્જ્વલકોમલકણ્ઠરુચં
    રુચકાત્તવિશેષકવલ્ગુતરમ્ ॥ ૩॥

તરલપ્રચલાકપરીતશિખં
    શિખરીન્દ્રધૃતિ પ્રતિપન્નભુજમ્ ।
ભુજગેન્દ્રફણાઙ્ગણરઙ્ગધરં
    ધરકન્દરખેલનલુબ્ધહૃદમ્ ॥ ૪॥

હૃદયાલુસુહૃદ્ગણદત્તમહં
    મહનીયકથાકુલધૂતકલિમ્ ।
કલિતાખિલદુર્જયબાહુબલં
    બલવલ્લવશાવકસન્નિહિતમ્ ॥ ૫॥

હિતસાધુસમીહિતકલ્પતરું
    તરુણીગણનૂતનપુષ્પશરમ્ ।
શરણાગતરક્ષણદક્ષતમં
    તમસાધુકુલોપલચણ્ડકરમ્ ॥ ૬॥

કરપદ્મમિલત્કુસુમસ્તવકં
    બકદાનવમત્તકરીન્દ્રહરિમ્ ।
હરિણીગણહારકવેણુકલં
    કલકણ્ઠરવોજ્જ્વલકણ્ઠરણમ્ ॥ ૭॥

રણખણ્ડિતદુર્જનપુણ્યજનં
    જનમઙ્ગલકીર્તિલતાપ્રભવમ્ ।
ભવસાગરકુમ્ભજનામગુણં
    ગુણસઙ્ગવિવર્જિતભક્તગણમ્ ॥ ૮॥

ગણનાતિગદિવ્યગુણોલ્લસિતં
    સ્મિતરશ્મિસહોદરવક્ત્રવરમ્ ।
વરદૃપ્તવૃષાસુરદારઘનં
    ઘનવિભ્રમવેશવિહારમયમ્ ॥ ૯॥

મયપુત્રતમઃક્ષયપૂર્ણવિધું
વિધુરીકૃતદાનવરાજકુલમ્ ।
કુલનન્દનમત્ર નમામિ હરિમ્ ॥ ૧૦॥

ઉરસિ પરિસ્ફુરદિન્દિરમિન્દિન્દિરમન્દિરશ્રજોલ્લસિતમ્ ।
હરિમઙ્ગનાતિમઙ્ગલમઙ્ગલસચ્ચન્દનં વન્દે ॥ ૧૧॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીહરિકુસુમસ્તવઃ સમ્પૂર્ણઃ ।

---

*Shri Harikusumastavah*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*